श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके दशमः प्रश्नः ॥

## (काठकम् - १)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके दशमः प्रश्नः ॥
## (काठकम् - १)

॥ हरिः ओ(४)म् ॥

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्।
संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तम्।
श्रेयो वसीय आयथ्सम्भूतं भूतम्।
चित्रः केतुः प्रभानाभान्थ्सम्भान्।
ज्योतिष्मागस्तेजस्वानातपग्स्तपन्नभितपन्।
रोचनो रोचमानः शोभनः शोभमानः कल्याणः।
दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना।
आप्यायमाना प्यायमाना प्याया सूनृतेरा।
आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी।
दाता प्रदाताऽऽनन्दो मोदः प्रमोदः॥ 1॥

आवेशयन्निवेशयन्थ्संवेशनः सग्ंशान्तः शान्तः।
आभवन्प्रभवन्थ्सम्भवन्थ्सम्भूतो भूतः।
प्रस्तुतं विष्टुतग्ं सग्स्तुतं कल्याणं विश्वरूपम्।
शुक्रममृतं तेजस्वि तेजः समिद्धम्।

Please let us know of any errors in this text.

अ॒रु॒णं भा॑नु॒मन्मरी॑चिमदभि॒तप॒त्तप॑स्वत्।
स॒वि॒ता प्र॑सवि॒ता दी॒प्तो दी॒पय॒न्दीप्य॑मानः।
ज्वल॑ञ्ज्वलि॒ता तप॑न्वि॒तप᳚न्थ्स॒न्तप॑न्।
रो॒च॒नो रोच॑मानः शु॒म्भूः शु॒म्भ॑मानो वा॒मः।
सु॒ता सु॑न्व॒ती प्रसु॑ता सू॒यमा॑नाऽभिषू॒यमा॑णा।
पीती᳚ प्र॒पा स॒म्पा तृप्ति॑स्त॒र्पय॑न्ती॥ **2**॥

का॒न्ता का॒म्या का॒मजा॒ताऽऽयु॑ष्मती काम॒दुघा᳚।
अ॒भि॒शा॒स्ताऽनु॑म॒न्ताऽऽन॒न्दो मोद॑ः प्रमो॒दः।
आ॒सा॒दय॑न्निषा॒दय᳚न्थ्स॒ग्ं॒सा॒द॒नः सग्ं॒स॑न्नः स॒न्नः।
आ॒भू॒र्वि॒भूः प्र॒भूः श॒म्भू॒र्भुव॑ः।
प॒वित्र॑ं पवि॒यि॒ष्यन्पू॒तो मेध्य॑ः।
यशो॒ यश॑स्वाना॒यु॒रमृत॑ः।
जी॒वो जी॑वि॒ष्यन्थ्स्व॒र्गो लो॒कः।
सह॑स्वा॒न्थ्सही॑या॒नोज॑स्वा॒न्थ्सह॑मानः।
जय॑न्नभि॒जय᳚न्थ्सु॒द्रवि॑णो॒ द्रविणो॒दाः।
आ॒र्द्रप॑वित्रो॒ हरि॑केशो॒ मोद॑ः प्रमो॒दः॥ **3**॥

अ॒रु॒णो॑ऽरु॒णर॑जाः पु॒ण्डरी॑को वि॒श्व॒जिद॑भि॒जित्।
आ॒र्द्रः पिन्व॑मा॒नोऽन्न॑वा॒न्रस॑वा॒निरा॑वान्।
स॒र्वौ॒ष॒धः स॑म्भ॒रो मह॑स्वान्।
ए॒ज॒त्का जो॑व॒त्काः।

क्षु॒ल्ल॒काः शिं॑पिवि॒ष्ट॒काः।
स॒रि॒स्र॒राः सु॒शेरं॑वः।
अ॒जि॒रासो॑ गमि॒ष्णवः॑।
इ॒दानीं॒ त॒दानीं॑मे॒तर्हि॑ क्षि॒प्रमं॑जि॒रम्।
आ॒शुर्नि॑मे॒षः फ॒णो द्रवं॑न्नति॒द्रवन्न्॑।
त्वर॒ग्ग्॒स्त्वरं॑माण आ॒शुराशी॑या॒ञ्जवः॑।
अ॒ग्नि॒ष्टो॒म उ॒क्थ्यो॑ऽतिरा॒त्रो द्विरा॒त्रस्त्रि॑रा॒त्रश्च॑तूरा॒त्रः।
अ॒ग्निर् ऋ॒तुः सूर्य॑ ऋ॒तुश्च॒न्द्रमा॑ ऋ॒तुः।
प्र॒जाप॑तिः संवथ्स॒रो म॒हान्कः॥ 4॥

प्र॒मो॒द॒स्त॒र्पयं॑न्ती प्रमो॒दो ज॒वस्त्रीणि॑ च॥ 1॥

भूर॒ग्निं च॑ पृ॒थि॒वीं च॒ मां च॑।
त्रीग्॒श्च॑ लो॒कान्थ्सं॑वथ्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
भुवो॑ वा॒यु चा॒न्तरि॑क्षं च॒ मां च॑।
त्रीग्॒श्च॑ लो॒कान्थ्सं॑वथ्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
स्वं॑रादि॒त्यं च॒ दिवं॑ च॒ मां च॑।
त्रीग्॒श्च॑ लो॒कान्थ्सं॑वथ्स॒रं च॑।

प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
भूर्भुव॒: स्व॑श्च॒न्द्रम॑सं च॒ दिश॑श्च॒ मां च॑।
त्रीग्श्च॑ लो॒कान्थ्सं॑वथ्स॒रं च॑।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 5॥

संवथ्सरं च षट्च॑॥ 2॥

त्वमे॒व त्वां वे॒॑त्थ॒ यो॑सि॒ सो॑सि॑।
त्वमे॒व त्वाम॑चैषीः।
चि॒तश्चासि॒ सञ्चि॑तश्चास्यग्ने।
ए॒तावा॒ग्॒श्चासि॒ भूयाग्॑श्चास्यग्ने।
यत्ते॑ अग्ने॒ न्यू॑न॒ं यदु॒ तेऽति॑रिक्तम्।
आ॒दि॒त्यास्तदङ्गि॑रसश्चिन्वन्तु।
विश्वे॑ ते दे॒वाश्चिति॒मापू॑रयन्तु।
चि॒तश्चासि॒ सञ्चि॑तश्चास्यग्ने।
ए॒तावा॒ग्॒श्चासि॒ भूयाग्॑श्चास्यग्ने।
मा ते॑ अग्नेऽच॒येन॒ माऽति॑ च॒ येनायु॒रावृ॑क्षि।
सर्वे॑षा॒ं ज्योति॑षा॒ं ज्योति॒र्यद्दावु॒देति॑।
तप॑सो जा॒तमनि॑भृष्ट॒मोज॑ः।
तत्ते॒ ज्योति॑रिष्टके।

तेनं मे तप।
तेनं मे ज्वल।
तेनं मे दीदिहि।
यावंद्देवाः।
यावदसांति सूर्यः।
यावंदुतापि ब्रह्मं॥ 6॥

आवृक्षि नवं च॥ 3॥

संवथ्सरोंऽसि परिवथ्सरोंऽसि।
इदावथ्सरोंऽसीदुवथ्सरोंऽसि।
इद्वथ्सरोंऽसि वथ्सरोंऽसि।
तस्यं ते वसन्तः शिरंः।
ग्रीष्मो दक्षिंणः पक्षः।
वर्षाः पुच्छंम्।
शरदुत्तंरः पक्षः।
हेमन्तो मध्यंम्।
पूर्वपक्षाश्चितंयः।
अपरपक्षाः पुरींषम्॥ 7॥

अहोरात्राणीष्टंकाः।
ऋषभोंऽसि स्वर्गो लोकः।
यस्यां दिशि महीयंसे।

ततो॑ नो॒ मह॒ आव॑ह।
वा॒युर्भू॒त्वा सर्वा॒ दिश॒ आवा॑हि।
सर्वा॒ दिशोऽनु॒ विवा॑हि।
सर्वा॒ दिशोऽनु॒ संवा॑हि।
चित्या॒ चिति॒मापृ॑ण।
अचि॑त्या॒ चिति॒मापृ॑ण।
चिद॑सि समु॒द्रयो॑निः॥ **8**॥

इन्दु॒र्दक्षः॑ श्ये॒न ऋ॒तावाँ॑।
हिर॑ण्यपक्षः शकु॒नो भु॑र॒ण्युः।
म॒हान्थ्स॒धस्थे॑ ध्रु॒व आनिष॑त्तः।
नम॑स्ते अस्तु॒ मा मा॑ हिग्ंसीः।
एति॒ प्रेति॒ वीति॒ समित्युदिति॑।
दिवं॑ मे यच्छ।
अ॒न्तरि॑क्षं मे यच्छ।
पृ॒थि॒वीं मे॑ यच्छ।
पृ॒थि॒वीं मे॑ यच्छ।
अ॒न्तरि॑क्षं मे यच्छ।
दिवं॑ मे यच्छ।
अह्ना॒ प्रसा॑रय।
रात्र्या॒ सम॑च।



prapatti dot com
sunder kidāmbi
sunder kidāmbi

रात्र्या॒ प्रसा॑रय।

अह्ना॒ सम॑ंच।

कामं॒ प्रसा॑रय।

काम॒गं॒ सम॑ंच॥ **9**॥

पुरी॑षगं॒ समु॒द्रयो॑निः पृथि॒वीं मे॑ यच्छा॒ऽन्तरि॑क्षं मे यच्छ स॒प्त च॑॥ **4**॥

भूर्भुव॒ः स्व॑ः।

ओजो॒ बल᳚म्।

ब्रह्म॑ क्ष॒त्रम्।

यशो॑ म॒हत्।

स॒त्यं तपो॒ नाम॑।

रू॒पम॒मृत᳚म्।

चक्षु॒ः श्रोत्र᳚म्।

मन॒ आयु॑ः।

वि॒श्वं यशो॑ म॒हः।

स॒मं तपो॒ हरो॒ भाः।

जा॒तवे॑दा॒ यदि॑ वा पाव॒कोऽसि॑।

वै॒श्वा॒न॒रो यदि॑ वा वैद्यु॒तोऽसि॑।

शं प्र॒जाभ्यो॒ यज॑मानाय लो॒कम्।

ऊर्जं॒ पुष्टिं॒ दद॑द॒भ्याव॑वृथ्स्व॥ **10**॥

भाश्च॒त्वारि॑ च॥ **5**॥

राज्ञी॑ वि॒राज्ञी᳚।
स॒म्राज्ञी᳚ स्व॒राज्ञी᳚।
अ॒र्चिः शो॒चिः।
तपो॒ हरो॒ भाः।
अ॒ग्निरिन्द्रो॒ बृह॒स्पतिः॑।
विश्वे॑ दे॒वा भुव॑नस्य गो॒पाः।
ते मा॒ सर्वे॒ यश॑सा॒ सग्ं सृ॑जन्तु॒॥ **11** ॥

राज्ञीन्द्रो॑ मा स॒प्त॥ **6** ॥

अस॑वे॒ स्वाहा॒ वस॑वे॒ स्वाहा᳚।
विभु॑वे॒ स्वाहा॒ विव॑स्वते॒ स्वाहा᳚।
अ॒भि॒भुवे॒ स्वाहाऽधि॑पतये॒ स्वाहा᳚।
दि॒वां॑पत॑ये॒ स्वाहाऽग्ं॑ह॒स्प॒त्याय॒ स्वाहा᳚।
चा॒क्षु॒ष्म॒त्याय॒ स्वाहा᳚ ज्योति॒ष्म॒त्याय॒ स्वाहा᳚।
राज्ञे॒ स्वाहा॑ वि॒राज्ञे॒ स्वाहा᳚।
स॒म्राज्ञे॒ स्वाहा᳚ स्व॒राज्ञे॒ स्वाहा᳚।
शूषा॑य॒ स्वाहा॒ सूर्या॑य॒ स्वाहा᳚।
च॒न्द्रम॑से॒ स्वाहा॒ ज्योति॑षे॒ स्वाहा᳚।
स॒ग्ं॒स॒र्पा॑य॒ स्वाहा॑ क॒ल्याणा॑य॒ स्वाहा᳚।
अर्जु॑नाय॒ स्वाहा᳚॥ **12** ॥

क॒ल्याणा॑य॒ स्वाहैकं॑ च॥ **7** ॥

वि॒प॒श्चिते॒ पव॑मानाय गायत।
म॒ही न धाराऽत्यन्धो॑ अर्॒षति।
अहि॑र्॒ह जी॒र्णामति॑सर्पति॒ त्वच᳚म्।
अत्यो॒ न क्रीड॑न्नसर॒द्वृषा॒ हरि॑ः।
उ॒प॒या॒मगृ॑हीतोऽसि मृ॒त्यवे᳚ त्वा॒ जुष्ट॑ं गृह्णामि।
ए॒ष ते॒ योनि॑र्मृ॒त्यवे᳚ त्वा।
अप॑ मृ॒त्युमप॒ क्षुध᳚म्।
अपे॒तः श॒पथ॑ं जहि।
अधा॑ नो अग्न॒ आव॑ह।
रा॒यस्पोष॑ग्ं सह॒स्रिण᳚म्॥ **13**॥

ये ते॑ स॒ह॒स्र॑म॒युत॒ं पाशा᳚ः।
मृत्यो॒ मर्त्या॑य॒ हन्त॑वे।
तान् य॒ज्ञस्य॑ मा॒यया᳚।
सर्वा॒नव॑यजामहे।
भ॒क्षो᳚ऽस्यमृतभ॒क्षः।
तस्य॑ ते मृ॒त्युपी॑तस्या॒मृत॑वतः।
स्व॒गाकृ॑तस्य॒ मधु॑मतः।
उप॑हूत॒स्योप॑हूतो भक्षयामि।
म॒न्द्राऽभिभू॑तिः के॒तुर्य॒ज्ञानां॒ वाक्।
असा॒वेहि॑॥ **14**॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi

अ॒न्धो जागृ॑विः प्राण।
असा॒वेहि॑।
ब॒धि॒र आ᳚क्रन्दयितरपान।
असा॒वेहि॑।
अ॒ह॒स्तोऽस्त्वा॒ चक्षुः॑।
असा॒वेहि॑।
अ॒पा॒दाशो॒ मनः॑।
असा॒वेहि॑।
कवे॒ विप्र॑चित्ते॒ श्रोत्रं॑।
असा॒वेहि॑॥ **15**॥

सु॒ह॒स्तः सुं॑वा॒साः।
शू॒षो नामा᳚स्य॒मृतो॒ मर्त्ये॑षु।
तं त्वा॒ऽहं तथा॒ वेदं॑।
असा॒वेहि॑।
अ॒ग्निर्मे॑ वा॒चि श्रि॒तः।
वाग्घृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृतं᳚।
अ॒मृतं॒ ब्रह्म॑णि।
वा॒युर्मे᳚ प्रा॒णे श्रि॒तः॥ **16**॥

प्रा॒णो हृद॑ये।
हृद॑य॒ं मयि॑।
अ॒हम॒मृते॑।
अ॒मृत॒ं ब्रह्म॑णि।
सूर्यो॑ मे॒ चक्षु॑षि श्रि॒तः।
चक्षु॑र्॒हृद॑ये।
हृद॑य॒ं मयि॑।
अ॒हम॒मृते॑।
अ॒मृत॒ं ब्रह्म॑णि।
च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः॥ **17**॥

मनो॒ हृद॑ये।
हृद॑य॒ं मयि॑।
अ॒हम॒मृते॑।
अ॒मृत॒ं ब्रह्म॑णि।
दिशो॑ मे॒ श्रोत्रे॑ श्रि॒ताः।
श्रोत्र॒ग्ं॒ हृद॑ये।
हृद॑य॒ं मयि॑।
अ॒हम॒मृते॑।
अ॒मृत॒ं ब्रह्म॑णि।
आपो॑ मे॒ रेत॑सि श्रि॒ताः॥ **18**॥

रेतो॒ हृद॑ये।

हृद॑यं॒ मयि॑।

अ॒ह॒म॒मृते᳚।

अ॒मृतं॒ ब्रह्म॑णि।

पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ता।

शरी॑र॒ग्ं॒ हृद॑ये।

हृद॑यं॒ मयि॑।

अ॒ह॒म॒मृते᳚।

अ॒मृतं॒ ब्रह्म॑णि।

ओ॒ष॒धि॒व॒न॒स्प॒तयो॑ मे॒ लोम॑सु श्रि॒ताः॥ **19**॥

लोमा॑नि॒ हृद॑ये।

हृद॑यं॒ मयि॑।

अ॒ह॒म॒मृते᳚।

अ॒मृतं॒ ब्रह्म॑णि।

इन्द्रो॑ मे॒ बले᳚ श्रि॒तः।

बल॒ग्ं॒ हृद॑ये।

हृद॑यं॒ मयि॑।

अ॒ह॒म॒मृते᳚।

अ॒मृतं॒ ब्रह्म॑णि।

प॒र्जन्यो॑ मे मू॒र्ध्नि श्रि॒तः॥ **20**॥

मू॒र्धा हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते᳚।
अ॒मृतं॒ ब्रह्म॑णि।
ईशा॑नो मे म॒न्यौ श्रि॒तः।
म॒न्युर्‌हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते᳚।
अ॒मृतं॒ ब्रह्म॑णि।
आ॒त्मा म॑ आ॒त्मनि॑ श्रि॒तः॥ **21** ॥

आ॒त्मा हृद॑ये।
हृद॑यं॒ मयि॑।
अ॒हम॒मृते᳚।
अ॒मृतं॒ ब्रह्म॑णि।
पुन॑र्म आ॒त्मा पुन॒रायु॒रागा᳚त्।
पुन॑ः प्रा॒णः पुन॒राकू॑त॒मागा᳚त्।
वै॒श्वा॒न॒रो र॒श्मिभि॑र्वावृधा॒नः।
अ॒न्तस्ति॑ष्ठत्व॒मृत॑स्य गो॒पाः॥ **22** ॥

स॒ह॒स्रिण॑मिहि॒ श्रोत्राऽसा॒वेहि॑ प्रा॒णे श्रि॒तो मन॑सि श्रि॒तो रेत॑सि श्रि॒ता
लोम॑सु श्रि॒ता मू॒र्ध्नि श्रि॒त आ॒त्मनि॑ श्रि॒तौ᳚ऽष्टौ च॑॥ **8** ॥

sunder kidambi prapatti dot com sunder kidambi

अ॒ग्निर्वा॒युस्सूर्य॑श्च॒न्द्रमा॒ दिश॒ आप॑ः पृथि॒व्यो॑षधिवनस्प॒तय॒
इन्द्र॑ः प॒र्जन्य॒ ईशा॑न आ॒त्मा पुन॑र्मे॒ त्रयो॑दश॥

प्र॒जाप॑तिर्दे॒वान॑सृजत।
ते पा॒प्मना॒ सन्दि॑ता अजायन्त।
तान्व्य॑द्यत्।
यद्व्य॒द्यत्।
तस्मा॒॑द्वि॒द्युत्।
तम॑वृश्चत्।
यदवृ॑श्चत्।
तस्मा॒द्वृष्टि॑ः।
तस्मा॒द्यत्रै॒ते दे॒वते॑ अभि॒प्राप्नु॑तः।
वि च॑ है॒वास्य॒ तत्र॑ पा॒प्मानं॒ द्यत॑ः॥ **23**॥

वृश्चत॑श्च।
सैषा मी॑मा॒ग्ं॒साऽग्नि॑हो॒त्र ए॒व सम्प॑न्ना।
अथो॑ आहुः।
सर्वे॑षु यज्ञक्र॒तुष्विति॑।
होष्य॑न्न॒प उप॑स्पृशेत्।
विद्यु॑दसि॒ विद्य॑ मे पा॒प्मान॒मिति॑।
अथ॑ हु॒त्वोप॑स्पृशेत्।
वृष्टि॑रसि॒ वृश्च॑ मे पा॒प्मान॒मिति॑।

यक्ष्यमाणो वेष्वा वाँ।
वि च हैवास्यैते देवते पाप्मानं घ्नतः॥ 24॥

वृश्चतंश्च।
अत्यगंहो हारुणिः।
ब्रह्मचारिणे प्रश्नान्प्रोच्य प्रजिघाय।
परेहि।
प्लक्षं दय्याम्पातिं पृच्छ।
वेत्थ सावित्रा(३)न्न वेत्था(३) इति।
तमागत्य पप्रच्छ।
आचार्यो मा प्राहैषीत्।
वेत्थ सावित्रा(३)न्न वेत्था(३) इति।
स होवाच वेदेति॥ 25॥

स कस्मिन्प्रतिष्ठित इति।
परोरजसीति।
कस्तद्यत्परोरजा इति।
एष वाव स परोरजा इति होवाच।
य एष तपति।
एषोऽर्वाग्रजा इति।
स कस्मिन्न्वेष इति।
सत्य इति।

किं तथ्स॒त्यमिति॑।
तप॒ इति॑॥ 26॥

कस्मि॒न्नु तप॒ इति॑।
बल॒ इति॑।
किं तद्बल॒मिति॑।
प्रा॒ण इति॑।
मा स्म॑ प्रा॒णमति॑ पृच्छ॒ इति॑
माऽऽचा॒र्योऽब्रवी॒दिति॑ होवाच ब्रह्मचा॒री।
स हो॑वाच प्ल॒क्षो दय्यां॒म्पातिः।
यद्वै ब्र॑ह्मचारिन्प्रा॒णमत्य॑प्रक्ष्यः।
मू॒र्धा ते॒ व्यप॑तिष्यत्।
अ॒हमु॑ त आचा॒र्याच्छ्रेयां॒न्भविष्यामि।
यो मा॑ सावि॒त्रे स॒मवा॑दि॒ष्टेति॑॥ 27॥

तस्मां॒थ्सावि॒त्रे न संव॑देत।
स यो ह॒ वै सा॑वि॒त्रं वि॒दुषा॑ सावि॒त्रे सं॒वद॑ते।
सहां॒स्मि॒ञ्छ्रियं॑ दधाति।
अनु॑ ह॒ वा अ॑स्मा अ॒सौ तप॒ञ्छ्रियं॑ मन्यते।
अन्व॑स्मै॒ श्रीस्तपो॑ मन्यते।
अन्व॑स्मै॒ तपो॒ बलं॑ मन्यते।
अन्व॑स्मै॒ बलं॑ प्रा॒णं म॑न्यते।

स यदाहं।
सं॒ज्ञानं॑ वि॒ज्ञानं॒ द॒र्शा दृ॒ष्टेतिं।
ए॒ष ए॒व तत्॥ **28** ॥

अथ॒ यदाहं।
प्रस्तुं॒तं विष्टुंतग्ं सु॒ता सुंन्व॒तीतिं।
ए॒ष ए॒व तत्।
ए॒ष ह्येंव तान्यहांनि।
ए॒ष रात्रंयः।
अथ॒ यदाहं।
चि॒त्रः के॒तुर्दा॒ता प्रंदा॒ता संवि॒ता
प्रंसवि॒ताऽभिंशा॒स्ताऽनुंम॒न्तेतिं।
ए॒ष ए॒व तत्।
ए॒ष ह्येंव तेऽह्नों मुहू॒र्ताः।
ए॒ष रात्रेंः॥ **29** ॥

अथ॒ यदाहं।
प॒वित्रं॑ पवयि॒ष्यन्थ्सहं॒स्वा॒न्थ्सहींयान -
रु॒णोंऽरु॒णरंजा॒ इतिं।
ए॒ष ए॒व तत्।
ए॒ष ह्येंव तेंऽर्धमा॒साः।
ए॒ष मासाः।

अथ यदाह।
अग्निष्टोम उक्थ्योँऽग्निर् ऋतुः प्रजापतिः
संवथ्सर इति।
एष एव तत्।
एष ह्येव ते यज्ञक्रतवः।
एष ऋतवः॥ **30** ॥

एष संवथ्सरः।
अथ यदाह।
इदानीँ तदानीमिति।
एष एव तत्।
एष ह्येव ते मुहूर्तानाँ मुहूर्ताः।
जनको ह वैदेहः।
अहोरात्रैः समाजगाम।
तगँ होचुः।
यो वा अस्मान् वेद।
विजहत्पाप्मानमेति॥ **31** ॥

सर्वमायुरेति।
अभि स्वर्गं लोकं जयति।
नास्यामुष्मिँल्लोकेऽन्नँ क्षीयत इति।
विजहद्ध वै पाप्मानमेति।

सर्व॒मायु॑रेति।
अ॒भि स्व॒र्गं लो॒कं जं॑यति।
नास्या॒मुष्मिं॑ल्लो॒केऽन्नं॑ क्षीयते।
य ए॒वं वेद॑।
अहीं॑ना॒ हाश्वं॑त्थ्यः।
सा॒वि॒त्रं वि॒दाञ्चं॑कार॥ **32**॥

सह॑ ह॒गुं॒सो हिं॑र॒ण्मयो॑ भू॒त्वा।
स्व॒र्गं लो॒कमिं॑याय।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
ह॒गुं॒सो ह॒ वै हिं॑र॒ण्मयो॑ भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
य ए॒वं वेद॑।
दे॒व॒भा॒गो ह॑ श्रौत॒र्॒षः।
सा॒वि॒त्रं वि॒दाञ्चं॑कार।
तगं॑ ह॒ वागदृं॑श्यमा॒नाऽभ्युं॑वाच॥ **33**॥

सर्वं॑ बत गौत॒मो वे॑द।
यः सां॑वि॒त्रं वेदेतिं॑।
स हों॑वाच।
कैषा वा॒गसीतिं॑।

अ॒यम॒हग्ं सा॑वि॒त्रः।
दे॒वाना॑मुत्त॒मो लो॒कः।
गु॒ह्यं॑ म॒हो॒ बि॒भ्र॒दिति॑।
ए॒ताव॑ति ह गौत॒मः।
य॒ज्ञो॒प॒वी॒तं कृ॒त्वाऽधो निप॑पात।
नमो॒ नम॒ इति॑॥ **34**॥

स हो॑वाच।
मा भैंषीर्गौतम।
जि॒तो वै ते॑ लो॒क इति॑।
तस्मा॒द्ये के च॑ सावि॒त्रं वि॒दुः।
सर्वे॒ ते जि॒तलो॑काः।
स यो ह॒ वै सा॑वि॒त्रस्या॒ष्टाक्ष॑रं प॒दग्ग्
श्रि॒याऽभिषि॑क्त॒ं वेद॑।
श्रि॒या है॒वाभिषि॑च्यते।
घृणि॒रिति॒ द्वे अ॒क्षरे॑।
सूर्य॒ इति॒ त्रीणि॑।
आ॒दि॒त्य इति॒ त्रीणि॑॥ **35**॥

ए॒तद्वै सा॑वि॒त्रस्या॒ष्टाक्ष॑रं प॒दग्ग्
श्रि॒याऽभिषि॑क्तम्।
य ए॒वं वेद॑।

sunder kidambi prapatti dot com sunder kidambi

श्रि॒या है॒वाभिषि॑च्यते।
तदे॒तदृ॒चाऽभ्यु॑क्तम्।
ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑मन्न्।
यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुः।
यस्तन्न वे॒द किमृ॒चा क॑रिष्यति।
य इत्तद्वि॒दुस्त इ॒मे समा॑सत॒ इति॑।
न ह॒ वा ए॒तस्य॒र्चा न यजु॑षा॒ न साम्नाऽर्थो᳚ऽस्ति।
यः सा॑वि॒त्रं वेद॑॥ **36**॥

तदे॒तत्प॑रि॒यद्दे॑वच॒क्रम्।
आ॒र्द्रं पिन्व॑मानग्ग् स्व॒र्गे लो॒क ए॑ति।
वि॒जह॒द्विश्वा॑ भू॒तानि॑ स॒म्पश्य॑त्।
आ॒र्द्रो ह॒ वै पिन्व॑मानः स्व॒र्गे लो॒क ए॑ति।
वि॒जह॒न्विश्वा॑ भू॒तानि॑ स॒म्पश्य॑न्न्।
य ए॒वं वेद॑।
शू॒षो ह॒ वै वा᳚र्ष्णे॒यः।
आ॒दि॒त्येन॑ स॒माज॑गाम।
तग्ं हो॑वाच।
एहि॑ सावि॒त्रं वि॑द्धि।
अ॒यं वै स्व॒र्ग्यो᳚ऽग्निः
पा॑रयि॒ष्णु॒रमृता॒थ्सम्भू॑त॒ इति॑।

एष वाव स सा॑वि॒त्रः।
य ए॒ष तप॑ति।
एहि॒ मां वि॑द्धि।
इति॑ है॒वैन॒ं तदु॑वाच॥ 37॥

द्यतो॒ द्यतो॒ वेदेति॒ तप॒ इति॑ स॒मवा॑दि॒ष्टेति॒ तद्रात्रे॑ऽ ऋ॒तव॑ एति चकारोवाच॒ नम॒ इत्या॑दि॒त्य इति॒ त्रीणि॑ सावि॒त्रं वेद॑ विद्धि॒ पञ्च॑ च॥ 9॥

प्र॒जाप॑तिर्दे॒वान्थ्सं॒ज्ञान॒ं प्रस्तु॒तं॒ तान्यहा॑न्ये॒ष रात्र॑यश्चि॒त्रः के॒तुस्तेऽह्नो॑ मुहू॒र्ता रात्रैः॑ प॒वित्र॒ं तेऽर्धमा॒सा अ॑ग्निष्टो॒मो य॑ज्ञक्र॒तव॑ इ॒दानी॑ मुहू॒र्ताना॑ जन॒कोऽह्नी॑ना देवभा॒गः कैषा वाङ्गा शू॒षो ह॒ वै षोड॑श॥

इ॒यं वाव स॒रघा॑।
तस्या॑ अ॒ग्निरे॒व सा॑र॒घं मधु॑।
या ए॒ताः पू॑र्वपक्षापरप॒क्षयो॒ रात्र॑यः।
ता म॑धु॒कृत॑ः।
यान्यहा॑नि।
ते म॑धुवृ॒षाः।
स यो ह॒ वा ए॒ता म॑धु॒कृत॑श्च मधुवृ॒षाग्॑श्च॒ वेद॑।
कु॒र्वन्ति॑ हास्यै॒ता अ॒ग्नौ मधु॑।
नास्यै॑ष्टापू॒र्तं ध॑यन्ति।
अथ॒ यो न वेद॑॥ 38॥

न हा॑स्यै॒ता अ॒ग्नौ मधु॑ कु॒र्वन्ति।
धय॑न्त्यस्येष्टापू॒र्तम्।

यो ह॒ वा अ॑होरा॒त्राणा॑ᳪं नाम॒धेया॑नि॒ वेद॑।
नाहो॑रा॒त्रेष्वार्ति॒माच्र्छ॑ति।
स॒ञ्ज्ञान॑ वि॒ज्ञान॒ दर्॒शा॑ दृ॒ष्टेति॑।
ए॒ताव॑नुवा॒कौ पूᳪर्वप॒क्षस्या॑होरा॒त्राणा॑ᳪं नाम॒धेया॑नि।
प्रस्तु॑त॒ विष्टु॑तग्ं सु॒ता सु॑न्व॒तीति॑।
ए॒ताव॑नुवा॒काव॑परप॒क्षस्या॑होरा॒त्राणा॑ᳪं नाम॒धेया॑नि।
नाहो॑रा॒त्रेष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑॥ **39**॥

यो ह॒ वै मु॑हू॒र्तानां॑ नाम॒धेया॑नि॒ वेद॑।
न मु॑हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
चि॒त्रः के॒तुर्दा॒ता प्र॑दा॒ता स॑वि॒ता
प्र॑सवि॒ताऽभि॑शा॒स्ताऽनु॑म॒न्तेति॑।
ए॒ते॑ऽनुवा॒का मु॑हू॒र्तानां॑ᳪ नाम॒धेया॑नि।
न मु॑हू॒र्तेष्वार्ति॒माच्र्छ॑ति।
य ए॒वं वेद॑।
यो ह॒ वा अ॑र्धमा॒साना॑ᳪं च॒ मासा॑नां च
नाम॒धेया॑नि॒ वेद॑।
नार्धमा॒सेषु॒ न मासे॒ष्वार्ति॒माच्र्छ॑ति।
प॒वित्रं॑ पवयि॒ष्यन्थ्सह॑स्वा॒न्थ्सही॑यान -
रु॒णो॑ऽरु॒णर॑जा॒ इति॑।

एतेऽनुवाका अर्धमासानां च
मासानां च नामधेयानि॥ **40**॥

नार्धमसेषु न मासेष्वार्तिमार्च्छति।
य एवं वेद।
यो ह वै यज्ञक्रतूनां चर्तूनां च
संवथ्सरस्य च नामधेयानि वेद।
न यज्ञक्रतुषु नर्तुषु न संवथ्सर
आर्तिमार्च्छति।
अग्निष्टोम उक्थ्योऽग्निर् ऋतुः
प्रजापतिः संवथ्सर इति।
एतेऽनुवाका यज्ञक्रतूनां चर्तूनां च
संवथ्सरस्य च नामधेयानि।
न यज्ञक्रतुषु नर्तुषु न संवथ्सर
आर्तिमार्च्छति।
य एवं वेद।
यो ह वै मुहूर्तानां मुहूर्तान् वेद।
न मुहूर्तानां मुहूर्तेष्वार्तिमार्च्छति॥ **41**॥

इदानीं तदानीमिति।
एते वै मुहूर्तानां मुहूर्ताः।

न मुंहूर्तानाँ मुहूर्तेष्वार्ति॒माच्र्छंति।
य ए॒वं वेदं।
अथो॒ यथा॑ क्षेत्र॒ज्ञो भूत्वाऽनुंप्र॒विश्यान्न॒मत्तिं।
ए॒वमे॒वैतान्क्षै॑त्र॒ज्ञो भू॒त्वाऽनुंप्र॒विश्यान्नंमत्ति।
स ए॒तेषांमे॒व संलो॒कता॒गं॒ सायुंज्यमश्नुते।
अपं पुनर्मृ॒त्युं जंयति।
य ए॒वं वेदं॥ 42॥

न वे॒दैवं वेदांऽनुवा॒का अंर्धमा॒सानाँ च॒ मासांनां च नाम॒धेयांनि मुहूर्तेष्वार्ति॒माच्र्छंति॒ नवं च॥ 10॥

इ॒यमंहोरा॒त्राणाग्ं॒ सं॒ज्ञानं पूर्वप॒क्षस्य॒ प्रस्तुंतमपरप॒क्षस्यं मुहूर्तानाँ चि॒त्रः के॒तुरंर्धमा॒सानाँ प॒वित्रं यज्ञक्रतू॒नामंग्निष्टो॒मो यंज्ञक्रतू॒नामि॒दानीँ मुहूर्तानाँ मुहूर्तान्॒ वे॒देदानी॒मथो॒ द्वादंश॥

कश्चिं॒द्ध वा अ॒स्माल्लो॒कात्प्रेत्यं।
आ॒त्मानं वेद।
अ॒यम॒हम॒स्मीतिं।
कश्चि॒थ्स्वं लो॒कं न प्रति॒ प्रजांनाति।
अ॒ग्निर्मुंग्धो है॒व धू॒मतांन्तः।
स्वं लो॒कं न प्रति॒ प्रजांनाति।
अथ॒ यो है॒वैतम॒ग्निग्ं॒ सांवि॒त्रं वेदं।
स ए॒वास्माल्लो॒कात्प्रेत्यं।

आ॒त्मानं᳚ वेद।
अ॒यम॒हम॒स्मीति॑॥ **43** ॥

स स्वं लो॒कं प्रति॒ प्रजा॑नाति।
ए॒ष उ॑ वे॒वैनं॒ तथ्सा॑वि॒त्रः।
स्व॒र्गं॑ लो॒कम॒भिवं॑हति।
अ॒हो॒रा॒त्रैर्वा इ॒दग्ं स॒युग्भिः॑ क्रियते।
इ॒ति॒रा॒त्राया॑दीक्षिषत।
इ॒ति॒रा॒त्राय॑ व्रतमुपा॑गु॒रिति॑।
तानि॒हाने॑वं वि॒दुषः॑।
अ॒मु॒ष्मिं॑ल्लो॒के शें॑व॒धिं धं॑यन्ति।
धी॒तग्ं है॒व स शें॑व॒धिमनु॒ परै॑ति।
अथ॒ यो है॒वैतम॒ग्निग्ं सा॑वि॒त्रं वेद॑॥ **44** ॥

तस्यं॑ है॒वाहो॑रा॒त्राणि॑।
अ॒मु॒ष्मिं॑ल्लो॒के शें॑व॒धिं न धं॑यन्ति।
अधी॑तग्ं है॒व स शें॑व॒धिमनु॒ परै॑ति।
भ॒रद्वा॑जो ह त्रि॒भिरायु॑र्भिर्ब्रह्म॒चर्य॑मुवास।
तग्ं ह॒ जीर्णि॒ग्ग्॒ स्थवि॑र॒ग्ं॒ शया॑नम्।
इन्द्रं॑ उप॒व्रज्यो॑वाच।
भर॑द्वाज।
यत्ते॑ चतु॒र्थमायु॑र्द॒द्याम्।

किमे॑नेन कुर्या॒ इति॑।
ब्र॒ह्म॒चर्य॑मे॒वैने॑न चरे॒य॒मिति॑ होवाच॥ **45**॥

तग्ं ह॒ त्रीन्गि॒रिरू॑पा॒नवि॑ज्ञातानिव दर्श॒यां च॑कार।
तेषा॒ग्ं॒ हैकै॑कस्मान्मु॒ष्टिनाऽऽद॑दे।
स हो॑वाच।
भर॑द्वा॒जेत्या॒मन्त्र्य॑।
वेदा॒ वा ए॒ते।
अ॒न॒न्ता वै वेदाः᳚।
ए॒तद्वा ए॒तैस्त्रि॒भिरायु॑र्भि॒रन्व॑वोचथाः।
अथ॑ त॒ इत॑र॒दन॑नूक्तमे॒व।
एही॒मं वि॑द्धि।
अ॒यं वै स॑र्ववि॒द्येति॑॥ **46**॥

तस्मै॑ हैतम॒ग्निग्ं सा॑वि॒त्रमु॑वाच।
तग्ं स वि॑दि॒त्वा।
अ॒मृतो॑ भू॒त्वा।
स्व॒र्गं लो॒कमि॑याय।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
अ॒मृतो॑ है॒व भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।

य ए॒वं वेद॑।
ए॒षो ए॒व त्रयीं॑ वि॒द्या॥ 47॥

याव॑न्तग्ं ह॒ वै त्र॒य्या वि॒द्यया॑ लो॒कं ज॑यति।
ताव॑न्तं लो॒कं ज॑यति।
य ए॒वं वेद॑।
अ॒ग्नेर्वा ए॒तानि॑ नाम॒धेया॑नि।
अ॒ग्नेरे॒व सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
वा॒योर्वा ए॒तानि॑ नाम॒धेया॑नि।
वा॒योरे॒व सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
इन्द्र॑स्य॒ वा ए॒तानि॑ नाम॒धेया॑नि॥ 48॥

इन्द्र॑स्यै॒व सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
बृह॒स्पते॒र्वा ए॒तानि॑ नाम॒धेया॑नि।
बृह॒स्पते॑रे॒व सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।
प्र॒जाप॑ते॒र्वा ए॒तानि॑ नाम॒धेया॑नि।
प्र॒जाप॑तेरे॒व सायु॑ज्यग्ं सलो॒कता॑माप्नोति।
य ए॒वं वेद॑।

ब्रह्मणो वा एतानि नामधेयानि।
ब्रह्मण एव सायुज्यगं सलोकतामाप्नोति।
य एवं वेद।
स वा एषोऽग्निरपक्षपुच्छो वायुरेव।
तस्याग्निर्मुखम्।
असावादित्यः शिरः।
स यदेते देवते अन्तरेण।
तथ्सर्वगं सीव्यति।
तस्माँथ्सावित्रः॥ **49**॥

अयमहमस्मीति वेद होवाच सर्वविद्येति विद्येन्द्रस्य वा एतानि नामधेयानि ब्रह्मण एव सायुज्यगं सलोकतामाप्नोति सप्त च॥ **11**॥

अग्नेर्वायोरिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मणस्स वै सप्त॥

संज्ञानं भूस्त्वमेव संवथ्सरोऽसि भू राज्यसंवे विपश्चिते प्रजापतिर्देवानियं वाव सरघा कश्चिद्धैकादश॥ **11**॥

संज्ञानगं राज्ञी मूर्धा हृदय एष संवथ्सरो नार्धमासेषु नवचत्वारिगंशत्॥ **49**॥

संज्ञानगं सावित्रः॥

॥ हरिः ओ(३)म्॥

॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके दशमः प्रश्नः समाप्तः॥